# Ṛgveda 10.121

**F. Max Müller, Hymns of the Rig-Veda in the Samhita and Pada Texts, Vol. II**



॥१२१॥ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्। स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥१॥ य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः। यस्य छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम ॥२॥ यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव। य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥३॥ यस्येमे हिमवंतो महित्वा यस्य समुद्रं रसया सहाहुः। यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम॥४॥ येन द्यौरुग्रा पृथिवी च दृळ्हा येन स्वः स्तभितं येन नाकः। यो अंतरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ॥५॥३॥ यं क्रंदसी अवसा तस्तभाने अभ्यैक्षेतां मनसा रेजमाने। यत्राधि सूर उदितो विभाति कस्मै देवाय हविषा विधेम॥६॥ आपो ह यद्बृहतीर्विश्वमायन्गर्भं दधाना जनयंतीरग्निं। ततो देवानां समवर्ततासुरेकः कस्मै देवाय हविषा विधेम ॥७॥ यश्चिदापो महिना पर्यपश्यद्दक्षं दधाना जनयंतीर्यज्ञं। यो देवेष्वधि देव एक आसीत्कस्मै देवाय हविषा विधेम ॥८॥ मा नो हिंसीज्जनिता यः पृथिव्या यो वा दिवं सत्यधर्मा जजान। यश्चापश्चंद्रा बृहतीर्जजान कस्मै देवाय हविषा विधेम ॥९॥ प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव। यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणां ॥१०॥४॥

॥१२१॥ हिरण्यऽगर्भः सं अवर्तत अग्रे भूतस्य जातः पतिः एकः आसीत् सः दाधार पृथिवीं द्यां उत इमां कस्मै देवाय हविषा विधेम॥१॥ यः आत्मऽदाः बलऽदाः यस्य विश्वे उपऽआसते प्रऽशिषं यस्य देवाः यस्य छाया अमृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम ॥२॥ यः प्राणतः निऽमिषतः महिऽत्वा एकः इत् राजा जगतः बभूव यः ईशे अस्य द्विऽपदः चतुःऽपदः कस्मै देवाय हविषा विधेम॥३॥ यस्य इमे हिमऽवंतः महिऽत्वा यस्य समुद्रं रसया सह आहुः यस्य इमाः प्रऽदिशः यस्य बाहू कस्मै देवाय हविषा विधेम॥४॥ येन द्यौः उग्रा पृथिवी च दृळ्हा येन स्वः॰ स्तभितं येन नाकः यः अंतरिक्षे रजसः विऽमानः कस्मै देवाय हविषा विधेम॥५॥३॥ यं क्रंदसी अवसा तस्तभाने अभि ऐक्षेतां मनसा रेजमाने यत्र अधि सूरः उत्ऽइतः विऽभाति कस्मै देवाय हविषा विधेम॥६॥ आपः ह यत् बृहतीः विश्वं आयन् गर्भं दधानाः जनयंतीः अग्निं ततः देवानां सं अवर्तत असुः एकः कस्मै देवाय हविषा विधेम॥७॥ यः चित् आपः महिना परिऽअपश्यत् दक्षं दधानाः जनयंतीः यज्ञं यः देवेषु अधि देवः एकः आसीत् कस्मै देवाय हविषा विधेम॥८॥ मा नः हिंसीत् जनिता यः पृथिव्याः यः वा दिवं सत्यऽधर्मा जजान यः च अपः चंद्राः बृहतीः जजान कस्मै देवाय हविषा विधेम॥९॥ प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणां ॥१०॥४॥